[५२] स्वराद्यन्तोपसृष्टादिति वक्तव्यम् । (म.भा. १. २९०)

उद्युङ्क्ते । नियुङ्क्ते । [1]स्वराद्यन्तोपसृष्टात् इति किम्? संयुनक्ति ॥

## समः क्ष्णुवः । (६५/२७३६)

'क्ष्णु तेजने' (धा.पा. १०३७) परस्मैपदी । [2]ततः सम्पूर्वात्[3] आत्मनेपदं भवति । 'समो गम्यृच्छि°' (१.३.२९. २६९९) इत्यत्रैव[4] कस्मान् न [5]पठितः? अकर्मकात् इति [6]तत्र वर्तते[7] । संक्ष्णुते शस्त्रम् । संक्ष्णुवाते, [8]संक्ष्णुवते ॥

## भुजोऽनवने । (६६/२७३७)

'भुज पालनाभ्यवहारयोः' (धा.पा. १४५५) इति रुधादौ पठ्यते । तस्मादनवनेऽपालने वर्तमानादात्मनेपदं भवति । भुङ्क्ते, भुञ्जाते, भुञ्जते । अनवने इति किम्? भुनक्त्येनमग्निराहितः । अनवन इति [9]प्रतिषेधेन रौधादिकस्यैव ग्रहणं [10]विज्ञायते, [11]न तौदादिकस्य 'भुजो कौटिल्ये' (धा.पा. १४१८) इत्यस्य । तेनेह न भवति, [12]विभुजति पाणिम् ॥

## णेरणौ यत् कर्म णौ चेत् स कर्ताऽनाध्याने । (६७/२७३८)

'णिचश्च' (१.३.७४/२५६४) इति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । ण्यन्तादात्मनेपदं भवति । [13]कथम्? अणौ यत् कर्म णौ चेत् [14]तदेव कर्म, स एव कर्ता [15]भवति, अनाध्याने आध्यानं वर्जयित्वा[16] । आरोहन्ति हस्तिनं हस्तिपकाः (म.भा. १. २९१), आरोहयते हस्ती स्वयमेव । उपसिञ्चन्ति हस्तिनं [17]हस्तिपकाः, [18]उपसेचयते हस्ती स्वयमेव । पश्यन्ति भृत्या राजानम् (म.भा. १. २९१), दर्शयते राजा स्वयमेव । णेः इति किम्? आरोहन्ति हस्तिनं हस्तिपकाः, आरोह्यमाणो हस्ती साध्वारोहति[19] । अणौ इति किम्? गणयति [20]गणं गोपालकः, गणयति गणः स्वयमेव (म.भा. १. २९१) । कर्मग्रहणं किम् ? लुनाति दात्रेण, लावयति दात्रं स्वयमेव । णौ चेद्ग्रहणं [21]समानक्रियार्थम्––आरोहन्ति हस्तिनं हस्तिपकाः, आरोह्यमाणो हस्ती भीतान् सेचयति मूत्रेण । यत्सग्रहणमनन्यकर्मार्थम् । आरोहन्ति हस्तिनं हस्तिपकाः, आरोह्यमाणो हस्ती स्थलमारोहयति मनुष्यान्[22] । कर्ता इति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः, [23]तानारोहयति महामात्रः । अनाध्याने इति किम् ? स्मरति [24]वनगुल्मस्य कोकिलः, स्मरयत्येनं वनगुल्मः स्वयमेव (म.भा. १. २९२) ।

ननु चात्र कर्मकर्तरि मूलोदाहरणानि । तत्र [25]कर्मवद्भावेनैव सिद्धमात्मनेपदम् । किमर्थमिदमुच्यते ? कर्मस्थभावकानां कर्मस्थक्रियाणां च[26] कर्मवदतिदेशो विज्ञायते । कर्तृस्थार्थोऽयमारम्भः । [27]तथा च रुहिः कर्तृस्थक्रियः,[28] दृशिः कर्तृस्थभावकः उदाहृतः ॥

---

1. स्वराद्यन्तग्रहणम् ड, स्वरादिति किम्? निर्युनक्ति, दुर्युनक्ति फ. 2. तस्मात् ह. 3. क्ष्णु इत्येतस्माद् धातोः इत्यधिकम् फ. 4. एव नास्ति फ. 5. पठितम् फ, कस्मादयं न ड. 6. तु इत्यधिकम् फ. 7. सकर्मकार्थमिदं वचनम् इत्यधिकम् फ. 8. संक्ष्णुवते ई. 9. अवनप्रतिषेधे ब, अवनप्रतिषेधेन क.ड. 10. विज्ञायते नास्ति ड. 11. न .... इत्यस्य नास्ति फ. 12. भुजति निर्भुजति अ.ह, पाणिः ड. 13. कथम् नास्ति ब.फ. 14. तदेव नास्ति ब. 15. यदि भवति तदा फ. 16. आध्यानमुत्कण्ठापूर्वकं स्मरणम् इत्यधिकम् ड.फ. 17. सेचकाः अ. 18. सेचयते ड.फ. 19. स्थलम् इत्यधिकम् क. 20. गोगणं अ. 21. किम् इत्यधिकम् अ. 22. मनुष्यान् नास्ति क, मनुष्यान् इति फ. 23. तानारोहयन्ति महामात्राः अ.ड. 24. च इत्यधिकम् ब. 25. ततश्च कर्मणा तुल्यक्रियः इति इत्यधिकम् फ. 26. स इत्यधिकम् अ, कर्मवदित्यतिदेशः क.ड.फ. 27. तथा हि क. 28. विज्ञायते इत्यधिकम् ब.